नं० ४८४७

नाम - पद्धति रत्नमाला

कर्ता - राघवानन्दः जालंधरस्थः

पत्र संख्या - ८ पत्राणि सं० —— ×

विषयः - तंत्रम्

पद्धतिरत्नमाला

४९४७

4947

F = 8

पद्धतिरत्नमाला प

रा॰ प॰
१

ओम् श्रीगणेशाय नमः ॥ चित्तागारमधिष्ठितावितततमोराशेर्विनाशक्षमः स्फूर्जद्ब्रह्मपदप्रासमाश्रितरुचिस्तेजोल्लसद्विग्रहः पीठोत्कृष्टविभूतिभूषितवपुर्भास्वत्र

भामंडलः शंभुर्मंगलदीपतामुपगतो भूयान्मम श्रेयसे १ नत्वा हिमगिरिबालां हिमकरकिरणोल्लसज्ज्वालाम् पद्धतिं सुरत्नमालां तनुते श्रीराघवानन्दः २ अलसे
रत्नागमसंवीक्षेरसंप्रदायैश्च प्रागल्भ्यमधिकमाप्तुं स्वशिष्यपरिशीलितां सततं ३ दीक्षाख्यं प्रथमं रत्नं निजकृत्याभिधं ततः गुरुस्मरणरत्नं च निमित्तार्चनरत्नकं ४ का
म्यकर्माभिधं रत्नं त्रयमत्र यथाक्रमं दीक्षारत्ने प्रथमतो लक्षणं गुरुशिष्ययोः ५ दीक्षाफलं ततो दीक्षाकालदेशविवेचनं मंत्रसंशोधनोद्धारो वास्तुपूजणाहवाचनं ६
अंकुरारोपणविधिः सर्वतोभद्रमंडलं अधिवासनकृत्यं च दीक्षासर्वदिनेस्तनं ७ क्रियावती वर्णमयी तथैव च कलावती अथो वेधमयी दीक्षा तत्संक्षेपलक्षणः पं ८ तत्र
दीक्षितस्यैव सकलकर्माधिकारित्वं दीक्षा तु गुर्वधीनातः प्रथमं गुरुलक्षणमाह ज्ञानचूडामणौ कुलीनः सर्वविद्यानामधिकारीति गीयते दीक्षामुमुक्षुः स एवात्र सर्वमंत्र
साधनापरः कुलीनः कुलार्णवे उक्तः यो भवेत्कुलतत्त्वज्ञः कुलागमविशारदः कुलार्चनपरः स स्यात्कौलिको दांभिकोपरः कुलभक्तात्कुलाचारात्कुलाभिज्ञात्कुलव्रतात्
प्रीतो भवति यो दृष्ट्वा कौलिकः स तु मे प्रियः तत्त्वत्रयस्वीकरणमूलमंत्रार्थतत्त्ववित् देवतागुरुभक्तश्च कौलिकः स्यात्तु दीक्षया यस्योक्तो नाधिकारः पशुस्तु द्विविधो दे
विद्वेषणस्तु भैरव: अस्याधिकारः पूजायां न गुरुत्वे कदाचन द्विविधस्तु कुलाचारनिंदको निंदकश्च सः शाक्तदीक्षापरमेतत् गुरुलक्षणं कुलार्णवे श्रीगुरुः परमे
शानि शुद्धवेशो मनोहरः सर्वलक्षणसंयुक्तः सर्वावयवशोभितः सर्वागमार्थतत्त्वज्ञः सर्वमंत्रविधानवित् लोकसंमोहनाकारो देववत्प्रियदर्शनः सुमुखः सुलभः स्वच्छः
शुद्धांतश्छिन्नसंशयः इंगिताकारचेष्टाविद्वरतः कृतदुर्जनः अंतर्लक्ष्यबहिर्दृष्टिः सर्वतो देशकालवित् आज्ञासिद्धस्त्रिकालज्ञो निग्रहानुग्रहेक्षमः वेदवेदान्ततत्त्वज्ञः सर्वजी
वदयापरः स्वाधीनेंद्रियसंचारः षड्वर्गविजयक्षमः अग्रगण्योतिगंभीरः पात्रापात्रविशेषवित् निर्मलो नित्यसंतुष्टो निर्द्वंद्वो नित्यशक्तिमान् स्वभक्तवत्सलो धीरः कृपालुः स्मि
शिष्य= तपूर्ववाक् भक्तप्रियः सर्वसमो दयालुः सर्वशासिता सिद्धदेवगुरुप्राप्तो वनितास्वजनोत्सुकः नित्यनैमित्तिककाम्यरतः कर्मण्यनिंदिते रागद्वेषभयक्रोधदंभाहंकारवर्जितः
स्वविद्यानुष्ठानरतो विद्यानां च प्रकाशकः यदृच्छालाभसंतुष्टो गुणदोषविभेदकः स्त्रीधनादिषु नासक्तो दुःसंगव्यसनोज्झितः अलोलुपोहिंसकर्मा यं प्रजानाति विचक्षणः
चित्तविद्यादिभिर्मंत्रयंत्रतंत्राद्यविक्रयी निःसंकल्पो निर्विकल्पो निर्णीतात्मातिधार्मिकः तुल्यनिंदास्तुतिर्मौनी निरपेक्षो नियामकः इत्यादिलक्षणोपेतः श्रीगुरुः कथितः प्रिये शु
द्धचित्तो दयालुश्च ब्राह्मणो वेदपारगः कुलाचाररतो नित्यं कुलशास्त्रप्रयोजकः शांतः स्वाधीनसर्वज्ञो लोभमोहविवर्जितः क्रोधमोहपरित्यागी विरागी वीरवंदितः निगमागमवेत्ता च
प्रसन्नवरमानसः सर्वाश्रयपरित्यागी ललनार्चनतत्परः ईदृग्लक्षणसंयुक्तं भजेद्गुरुमादरात् महाकपिलपांचरात्रे नातिबालो न वृद्धश्च न खंजो न कृशस्तथा नाधिकांगो न
हीनांगो न खल्वाटो न दंतुरः कृतज्ञं वाग्मिनं शूरं प्रतिष्ठागमपारगं वास्तुविद्याकृताभ्यासं शल्योद्धारविवेकिनं क्रियानुक्रमवेत्तारं मुद्रातंत्रविवेकिनं तत्त्वसारे वक्ष्यमीदीर्घसूत्री च १
विषयादिषु लोलुपः हेतुवादरतो दुष्टो वाग्वादी गुणनिंदकः अरोमा बहुरोमा च निंदिताश्रमसेवकः कालदंतो सितोष्ठश्च दुर्गन्धिश्वासवाहकः दुष्टलक्षणसंपन्नो यद्यपि स्व
यमीश्वरः बहुप्रतिग्रहासक्त आचार्यः श्रीदयावहः तथा अपुत्रो ... अंधो वामनस्तथा कुनखी श्यावदंतश्च स्त्रीजितश्चाधिकांगकः हीनांगः कपटी रोगी बह्वाशी च
कुब्जकः एतैर्दोषैर्विहीनो यः सद्गुरुः शिष्यभाजनं स्वनाम्ना न गुरुः कार्यो भार्या च मातृनामिका देशकालश्रुताचारकुलशीलगुणान्वितः अर्थस्वभावसंपन्नो गुरुः स्यात्कुलोत्प
न्नः शारदायां गुरुर्यार्थसमावाप्ये सत्क्रियो गुरुमाश्रयेत् मातृतः पितृतः शुद्धः शुद्धभावो जितेंद्रियः सर्वागमानां सारज्ञः सर्वशास्त्रार्थतत्त्ववित् परोपकारनिरतो
जपपूजापरायणः अमोघवचनः शांतो वेदवेदार्थतत्त्ववित् योगमार्गानुसंधायी देवताहृदयंगमः इत्यादिगुणसंपन्नो गुरुरागमसंमतः शिवपद्धतौ मध्यदेशकुरुक्षेत्रना १
भोजयनसंभवाः अन्तर्वेदप्रतिष्ठानआवंत्याश्च गुरूत्तमाः गौडाः साल्वोद्भवाः सौराः मागधाः केरलास्तथा कौशलाश्च दशार्णाश्च गुरवः सप्त मध्यमाः कार्णाटनर्मदाकूक

दादीक्षोद्भवास्तथा कालिंगाः कामरूपाश्च कांबोजाश्चाधमा मताः भिक्षुश्च वनस्थश्चापि वृत्तिभिश्च श्रमहेश्वरि गृहस्थो भोगमोक्षार्थी मंत्रदीक्षां न चाचरेत् त्यक्ताश्रयः क्रियाहीना यतयो नियतग्रहाः
वनस्थास्त्वाश्रमाय च वर्णिनस्तुना श्रमीयतः अतस्तेषां नाधिकारो दीक्षादाने महेश्वरि पितृदीक्षायते दीक्षा दीक्षा च वनवासिनाम् विविक्ताश्रमिणां दीक्षा पुत्रायुर्धननाशिनी निर्वीर्यः पितुर्मंत्रेणा
थामा नाम रुद्रस्य च सोदरस्य कनिष्ठस्य वैरिपक्षाश्रितस्य च १८ इति गुरुलक्षणम् अथ शिष्यलक्षणं कुलार्णवे सच्छिष्यं तं कुले प्रान्तिसर्वलक्षणसंयुतं क्षमादिसाधनोपेतं गुणशीलसम
न्वितं शुद्धदेहान्वयाह्यं धार्मिकं शुद्धमानसम् दृढव्रतं सदाचारं श्रद्धाभक्तिसमन्वितम् कृतज्ञं पापभीतं च साधुसज्जनसंमतम् आस्तिकं दानशीलं च सर्वभूतहिते रतम् विश्वासविनयोपेतं
वित्तशाठ्यविवर्जितम् असाध्यसाधकं शूरं बलकांतिसमन्वितं अनुकूलक्रियायुक्तं प्रमत्तं विचक्षणं हितसत्यमितस्निग्धभाषणं मुक्तदूषणं सकृदुक्तगृहीतार्थं चतुरं बुद्धिविस्तरं गृहत
त्पाशनोत्संगनिर्विकारमसेवकं विमृश्यकारिणं वीरं मनोदारिद्र्यवर्जितम् सर्वकार्यनिकुशलं धीरं सर्वोपकारकं अन्यार्थपरनिंदायां विमुखं स्तुतिप्रिये जितेंद्रियं सत्यसंतुष्टं धीमंतं ब्रह्मचा
रिणं त्यक्ताधिकादिचापल्यं दुःशंकानकवर्जितम् गुरुध्याने स्तुतिकथासेवनाभजनोत्सुकम् गुर्वाज्ञापालकं देवि गुरुकीर्तिप्रशंसकं गुरुवाक्यप्रमाणज्ञं गुरुशुश्रूषणे रतम् चित्तानुवर्तिनं प्रे
क्षकारिणं कुलनायिके लज्जाभिमानगर्वादिवर्जितं गुरुसंनिधौ निरपेक्षं गुरुस्थैर्यं तत्प्रसादाभिकांक्षिणं ईषद्ज्ञानाद्विनिरतं मोक्षमार्गाभिगामिनं इत्यादिलक्षणोपेतं गुरुः शिष्यं परिग्रहेत् दुष्ट
नवायजं दुष्टगुणहीनं विरूपिणं परशिष्यं च पाखंडधूर्तं पंडितमानिनम् हीनाधिकविकाराङ्गविकलावयवान्वितं पंगुमंधं च बधिरं मलिनं व्याधिपीडितं उच्छिष्टदुर्मुखं चापि खिद्यावेशं धवि
टं दुर्विदग्धं उच्चैःस्थं च कुटिलं भीमवीक्षणं निद्रालस्ययुतं तंद्रायूतादिव्यसनान्वितं कपटकुप्रलंभादौ निरोहितं न तुं सदा मूल्यमुक्तिकरं दंडं श्रद्धाभक्तिविवर्जितम् किमेकं वादिनं त्वत्प्रे
ष्यकं च पलंपाठं धनस्त्रीसुद्विरहितं निषेधविधिवर्जितं रहस्यभेदकं चापि देवकार्यार्थयाचकं मातृरवकटूनिं च रंध्रान्वेषणतत्परं मायान्वितं कृतघ्नं च प्रकृत्या त्वांतरदायकं विश्वास
घातकं देवद्रोहकं पापकारकं अविश्वासमवद्यागमनं थीसिद्धिकांक्षिणं आततायिनमाद्दिं कुत्सितं कूटसाक्षिणं सर्वत्र याचकं देवि सर्वाहृदयाभिगामिनं असमनिश्वासकं याम्यादि
वद्भाषिणं दुर्विचारकृतं कर्ताद्विकारकं कलहप्रियम् स्वस्थान्देषकरं आत्मश्लाघकं वाचिडंबकं परोद्वेषणकं प्रमत्तं प्रियवादिनं वाचालवादिनं विद्याचौर्यमात्मप्रशंसकं गुणसहितं स
ह्रीनमतिक्रोधसमन्वितं चार्वाकं दुर्जनसंसर्वलोकविगर्हितं पिशुनं परसंतापं सर्वप्राणिभयंकरं आक्रोशवादिनं मित्रद्रोहि दंभात्त्वं वंचकं जिह्वोपस्थपरं देवि तत्कर्मपशुचेष्टितं अका
रणे द्वेषहास्यक्तं शाक्तक्रोधादिकारकं अतिहास्यस्य कर्तारं अभिमानः परित्यासकं कामुकं चातिनिर्लज्जं मिथ्याडंबरसूचकं असूयामदमात्सर्यदंभाहंकारसंयुतं ईर्ष्यापैशुन्यपारुष्यकार्पण्य
क्रोधशालिनं अधीरं दुःखितं द्वेष्यम् अभक्तं तत्त्ववर्जितं अप्रसिद्धमतिं मूढं चिंताकुलितमानसं तृष्णालोभयुतं दीनमतुष्टं सर्वयाचकं वक्ताशिनं कपटिनं आमकं कुटिलप्रिये भक्तिश्रद्धादयाशांतिध
र्माचारविवर्जितं मातापितृगुरुत्यागमहतां हास्यकारकं कुलद्रव्यादिवीभत्सं गुरुसेवाभिमानिनं स्त्रीडुष्टसमयभ्रष्टं गुरुपाशभेजुलेश्वरि इत्यादिविगुणोपेतं गुरुः शिष्यं परित्यजेत् स्नेहाद्वा लोभतो वापि
यदि गृह्णाति दीक्षयेत् तस्मिन् दुःखेषु शिष्येषु देवताशापमापयेत् तस्मादेवंविधं शिष्यं न गृह्णीयात्कथंचन यदि गृह्णाति लोभेन तत्पापं प्राप्नुयाद्गुरुः मंत्रिपापं च राजानं पतिं जारकृतं यथा तथा शि
ष्यकृतं पापं प्राप्नोति गुरुरसंशयः ध्यानेन क्रियया वापि गुरुः शिष्यं परीक्षयेत् संवत्सरं तदर्धं वा तदर्धं वा तदर्धकं उत्तमाधममेकार्थं नीचात्तत्समकर्मणि प्राणद्रव्यप्रदानाद्यैरादेशैश्च समास
मैः तन्मसेतूचके वीक्षोभीयाभिः क्रूरचेष्टितैः एवमादितदासीनैरन्यैः श्यमुजर्मजः आक्रूरः पीडितो वापि यो विषादं न याति च गुरुयापंकरोत्येवं मद्युक्तं कीर्तयेत्सदा श्रीगुरुस्मरणे चापि की
र्तने चापि वंदने परिचर्यायामाज्ञाने प्रेषणेन्वेषणे प्रिये आनंदकंपरोमांचस्वरनेत्रादिविक्रिया येषां स्यात्त्वं त्वयोग्याः स्युर्मंत्रसिद्धिरवीश्वरि शास्त्रदृष्ट्या शिष्यः कुलीनः शुद्धात्मा पुरुषार्थपराय
णः अधीतवेदकुशलो हृन्मुक्तमनोभवः हितैषी प्राणिनां नित्यमास्तिकस्त्यक्तनास्तिकः स्वधर्मनिरतो भक्त्या पितृमातृहितोद्यतः वाङ्मनःकायवसुभिर्गुरुशुश्रूषणे रतः एतादृग्गुणोपेतः शि
ष्यो भवति नापरः एकाहेन भवेद्योग्यो ब्राह्मणश्च द्वयेनृपः वैश्यो वर्षैस्त्रिभिः शूद्रश्चतुर्भिर्वत्सरैर्गुरुः सम्युक्तः परिसारः दीक्षायागव्रतादिषु इति शिष्यलक्षणम् कृते श्रुत्युक्तमार्गस्तु त्रेता
यांस्मृतिसंभवः द्वापरे तु पुराणोक्तः कलावागमसंभवः अशुद्धाः शूद्रकल्पा हि ब्राह्मणाः कलिसंभवाः तेषामागममार्गेण शुद्धिर्न श्रौतवर्त्मना तस्मादावश्यकी दीक्षा सर्वेषां ज्ञानेकवाक्यतः
सम्यग्विचार्य साध्यसिद्धसाध्यसुसिद्धारिचक्रादिसंशोधितः दीयते ज्ञानमत्यंतं क्षीयते पापसंचयं तस्माद्दीक्षेति सा प्रोक्ता वांछितार्थप्रसाधिनी ज्ञानं दिव्यं यतो दद्यात्कुर्यात्पापक्षयं ततः तेन दीक्षेति लोकेऽस्मिन् कोविदै
स्तंत्रपारगैः ब्रह्महत्यासुरापानस्वर्णस्तेयादिपातकं उपपातककलत्वाणि हंति दीक्षा श्रयान्नः दीक्षिता ब्राह्मणा यांति ब्रह्मलोकमनामयम् इंद्रलोकं च क्षत्रियास्तु प्राजापत्यं तथा विशः यांति गं
धर्वनगरं शूद्रा दीक्षाप्रभावतः चतुर्णामेव वर्णानामतो दीक्षा प्रशस्यते अदीक्षिता नाम सर्वेषां दोषाश्च एवं तु पतिताः अन्नं विष्ठासमं तस्य जलं मूत्रसमं पिबेत् अदीक्षितकृतं श्राद्धं श्राद्धं चादीक्षि
तस्य च गृहीत्वापि नरलोके नरके च स्तु दारुणे पतंत्येव न संदेहो यावदिंद्राश्चतुर्दश सर्वेषु रूपचारेषु भक्तियुक्तो यजेद्यदि तथाप्यदीक्षितस्यान्नं देवा गृह्णंति नैव च कर्माखिलं कृत्या यस्मात्तस्मा
त.श्रु द्दीक्षां समाश्रयेत् अदीक्षितस्तु मरणे रौरवं नरकं व्रजेत् आचार्यादनभिप्राप्य प्राप्तश्यादनदक्षिणा स तत्तजव्यमानोपि मंत्रः सिद्धिं न गच्छति द्विजानामुपनीतानां स्वकर्माध्ययनादिषु तथाचारी २५
क्षितानां च मंत्रदेवार्चनादिषु नाधिकारोस्त्यतः कुर्याद्दानं शिवसंस्कृतं यद्दत्तं यांश्च तं वापि स्नानेन वलेन वा पत्रे तच्च गायाथावत्सजन्मपि निष्फलं स्नेहाद्वा लोभतो वापि यद्गृह्णा
ः यदीक्षया तस्मिन् दोषे स शिष्यं च देवताप्राप्यमापयेत् गुरुः स्यात्किं पापसर्वा भुक्तिमुक्तिफलप्रदा तस्मात्स्याद्गुरुर्नित्यमत्यर्थं तु समाहितः पूर्वं तु कृतक्रियाः सर्वा निष्फलाः स्युर्यथापूर्वं अदीक्षि
तायै कुर्वंति जपपूजादिकाः क्रियाः न फलंति प्रिये ते वै शिलायामुप्तबीजवत् इति दीक्षामाहात्म्यं अथ दीक्षाकालाः चैत्रे दुःखाय दीक्षा स्याद्वैशाखे रत्नसंचयः मरणं भवति ज्येष्ठे चाषाढे बं

जन्मचंद्रः शुभः प्रोक्तो जन्मनक्षत्रवर्जितः शुक्लपक्षे द्वितीयस्तु
पंचमो नवमस्तथा गोचरे ये ग्रहाः शुद्धास्ते युक्तोपि शुभः शशी ५ ९

नाशनम् समृद्धिः श्रावणेन्नूनं भवेद्भाद्रपदे तथा प्रजानाशो पाश्विने तु भवेद्वा शुभमेव च ज्ञानं स्यात्कार्त्तिके सौख्यं मार्गशीर्षे भवेत्किल पौषे ज्ञानदयो माघे भवेन्मेधाविवर्द्धनं फाल्गु
ने सर्वसिद्धिः स्यान्मलमासं विवर्जयेत् आषाढः कवि प्रशस्तः शुक्लपक्षे शुभादी दीक्षा कृष्णे स्यात्पंचम्यवधिः प्रतिपदि द्वितीयायां तृतीयायां शुचिर्भवेत् चतुर्थ्यां विघ्ननाशः स्यात्पंचम्यां बुद्धिवर्द्ध
नम् षष्ठ्यां ज्ञानदयो सौख्यं लभते सप्तमीदिने अष्टम्यां बुद्धिनाशः स्यान्नवम्यां वपुषः क्षयः दशम्यां राज्यसौभाग्यमेकादश्यां शुचिर्भवेत् द्वादश्यां सर्वसिद्धिः स्यात्त्रयोदश्यां दरिद्रता तिर्यग्यो
रा॰ दी॰ प॰ निश्चतुर्दश्यां कानिर्मा सावसान के मंत्रारंभे प्रदोषे शुक्रो बुधो जीवो विशेषतः सानौ मे सुः दयो भौमे सोमे सर्वं च निष्फलं … रोहिणी … हस्तः स्वाती अनुराधा च मघा
२ मूलं च रेवती अभिजिच्छ्रवणं चैव दीक्षा न तत्र मुत्तमं योगाः प्रीतिरायुष्मान् सौभाग्यः शोभनः शुभः सुकर्मा च धृतिर्वृद्धिर्ध्रुवः सिद्धिश्च हर्षणः वरीयांश्च शिवः सिद्धो ब्रह्मा इन्द्रश्च षोडश
शकुन्यादीनि विष्टिं च विशेषेण विवर्जयेत् शुभानि करणान्याहुर्दीक्षायां च विशेषतः मंत्राद्यारंभणे मेषे धनधान्यप्रदं भवेत् वृषभे मरणमाप्नोति मिथुने पत्यनाशनं कर्कटे सर्वसिद्धिः स्यात्सिंहे
मेधाविनाशनं कन्या लक्ष्मीप्रदा नित्यं तुलायां सर्वसिद्धयः वृश्चिके सर्वसिद्धिः स्याद्धनुर्ज्ञानविनाशनः मकरः पुत्रदः प्रोक्तः कुंभो धनसमृद्धिदः मीनो दुःखप्रदो नित्यं मेषराशिफलं शिवे धर्मदः
प्रातःकालः स्यात्संगवो राज्यदायकः मध्याह्ने सर्वसिद्धिः स्यात्सायाह्ने मध्यमो भवेत् रजनी मंत्रदाने तु निषिद्धा देशिकोत्तमैः चरं सर्वं परिवर्ज्यं स्यात्स्थिरराशौ तु सौख्यदा स्थिरलग्ने विष्णुमंत्रे शिवमंत्रे च
द्वे शुभम् द्विस्वभावगते लग्ने शाक्तमंत्रः प्रशस्यते त्रिषडायगताः पापाः शुभाः केन्द्रत्रिकोणगाः दीक्षायां तु शुभाः सर्वे वक्त्या सर्वनाशकाः तृतीयेकादशे षष्ठे स्थाने च शुभः शशी शुभमध्यस्थि
तो वापि चंद्रमाः शुभदो भवेत् शुक्रोल्लोयदिवा हृद्गो गुर्वी दितो भवेद्यदि मेषवृश्चिकसिंहेषु तत्र दीक्षा न विद्यते अयने विषुवे चैव ग्रहणाद्युत्तथैव च ग्रहणे च महातीर्थे न कालस्य विचारणा क्षेत्र
त्री॰ सीनिकटे बिल्वमूले धात्रीनले तथा अनादि देवस्थाने मठे क्षेत्रे गवां गृहे देवीपुत्रादिने वापि नास्ति कालस्य निर्णयः योगिनीतंत्रे रविसंक्रमणे चैव सूर्यचंद्रग्रहे तथा तत्र लग्नादिकं किं
चिन्न किंचित्कार्यं कदाचन महाष्टम्यां विशेषेण धर्मकामार्थसिद्धये न कुर्याद्वर्णनं किंचिद्दीक्षा सुपरके विभावसौ न कुर्याद्दैवसर्वे दीक्षा तथा च भ्रमतो ग्रहे इति रुद्रयामलतंत्र उक्तम् कालीतारामहावि
द्या षोडशी भुवनेश्वरी भैरवी छिन्नमस्ता च विद्या धूमावती तथा बगला सिद्धविद्या च मातंगी कमलात्मिका एता एव महाविद्याः सिद्धविद्याः प्रकीर्तिताः नात्र सिद्धाद्यपेक्षास्ति नक्षत्रादिविचारणा का
२ लादिशोधनं नास्ति साध्यादि दूषणं न हि तिथिं विनापि दीक्षायां विशिष्टं वसरं स्मृतं दुर्लभे सद्गुरूणां तु सकृत्संगउपस्थिते तदनुज्ञा यदा लब्धा सदीक्षावसरो महान् ग्रामे वा यदि वारण्ये क्षेत्रे वा दिव
से निशि आगच्छति गुरुर्दैवाद्यदा दीक्षा तदा भवेत् यदैवेच्छा तदा दीक्षा गुरोराज्ञानुरूपतः न तिथिर्न व्रतं होमो न स्नानं न जपक्रिया दीक्षायाः कारणं किंतु स्वेच्छावाप्ते तु सद्गुरौ नारामचेतु विशेषः सूर्य
ऋते= पत्यश्चात् सः स्यां शुभे लग्ने शुभे तुलि सर्वेमाप्यदे … मित्रनाम संयुते अथवा चानुराधायां रेवत्यां तु प्रशस्यते जानीयाच्छोभनं कालं मंत्रसंग्रहलंपटि … विशेषेण कार्तिके तु विशेषतः महाची
नक्रमे व न दीक्षा नीलक्रमादे नक्षिद्रादिन नाशं च न राशिचक्रशोधनम् नक्षत्रं न धनं चक्रं न मासनियमस्तथा न पत्तिथिं न तत्र स्याज्जीवो वारो कुजार्कजौ इति कालनिर्णयः अथ देशः पुण्यतीर्थे कु
रुक्षेत्रे देवपीठचतुष्टये प्रयागे श्रीगिरौ कामरूपे कालाकाले न शोधयेत् गयायां भास्करे क्षेत्रे विजे चंद्रपर्वते मंत्रे मंडले चैव तथा कन्याश्रमे शुच नग्र … तीर्थे विष्णुपार्वति इति दीक्षादेशनि
र्णयः अथ मंत्रशोधनम् सारदायां बालो गोरिति … क्रमेण भेदिता वर्णाः कन्याद्याश्चादयः स्मृताः अर्थः अथ द्वादशराशीनां कचटतपयवर्गादक्षसंख्यया वर्णा
टि॰ ५ नक्षाः चतुस्त्रि त्रि द्वि द्वि पंच पंच कं चतुः संख्या कन्यायां अं अः इति क्रि वर्णाग्रे शादयः … मेष अ ४ वृष उ ३ मिथुन ऋ ३ कर्क ए २ सिंह ओ २ कन्या अं अः शा ६
तुला क ५ वृश्चिक च ५ धनुः ट ५ मकर त ५ कुंभ प ५ मीन य ४ साधकस्यात्तत्र राशेः पतनं … साधकात्तरात् एकपंचनव बांधवा मनसा … सेवकाः वह्निरुद्रमनुर्यस्तु पो
अष्टवेदरवयस्तु = षकाः द्वादशा घातकाः अथवा तनुर्धनं भ्रातृबंधुपुत्रारिकलत्रकाः मरणं धर्मकर्मायव्ययद्वादशराशयः तथा च स्वद्वितीयराशीयो मंत्रो धनदः स्यात्तृतीयस्तु भ्रातृ
सुचतुर्दशी दः स्यात् पंचमराशीयः पुत्रदः सप्तमराशीयो भार्याप्रदः एवमन्यद् … तत्र योग्यो मंत्र … पतति तदेव साधकस्य विराशिनदा … तथा समे तन्त्र कुण्डलयनवेय
घः ५५८: र्यं मंत्रमेवार्चनाया विनिगमकाभावात् राशिचक्रमध्ये … तेन मंत्राद्यवर्णनामलग्नेन तुः षष्ठे वा द्वादशे तु वा रिपुर्मंत्राद्यवर्णस्थानं तत्र मृत्युः तेन भवेदिति प्रयोगमुद्दिश्य नेत्रराजव
चनाच्च वस्तुतस्तु प्रकटं स्वजन्मनि … जन्मतो भवेत् प्रणवं जन्मभसमस्तनामानां मृत्तनाम वेदिति पिंगलामतवचनाद्यवस्था … शाकत्वाद … पूर्व
कयोगतः कोष्ठानि षोडशोषशुलिखेद्वर्णान्क्रमात्लिखितः प्रथमप्रथमे … द्वितीयप्रथमे तथा द्वितीयमस्तक … तत्तकोष्ठे विलिखेत् … पंचमम् … एवं चतुष्
र्वर्गेषु तावत् विलिखेत् स्वनामाद्यं ततः … सिद्धादीन्गणयेद्यावन्नामाद्यं … सिद्धसिद्धो जपात्सिद्धे … सिद्धसाधकः … सिद्धसुसिद्धः सिद्धारिः
तिगोत्रजान् साध्यसिद्धो … साध्यसाध्यो निष्फलः … सुसिद्धो भजनात्साधारिः … सुसिद्धसिद्धो … धनात्फलं दद्यादाथोप्सितं सुसिद्धसाध्यो जपादेः सिद्धये स्यात्तोन्यथा
सुसिद्धस्तु सिद्धस्तु … जन्मकृतः शुभः तस्मात्सर्वसिद्धानां साधने योजयेन्मनुं अभिचारे रिपोरेवं … सुसिद्धारिर्मोहेन … प्रयेत् ध्रुवं अरिसिद्धः सुतान्हन्यादरिसाध्यः स्व २
यं चित्ते … सुसिद्धमंत्रस्तु … अर्धशिः … पिंगलामते तु यथोक्तसिद्धमंत्रस्तु तत्साध्यो द्विगुणाज्जपात् तत्सुसिद्धोऽग्रहादेव तदरिर्बाधवान् :
द्विगुणजपात्साध्यसिद्धस्तु साध्यस्तु निरर्थकः तत्सिद्धः साध्यजपात् … सुसिद्धसिद्धो … जपात्तत्साध्यो द्विगुणाज्जपात् तत्सुसिद्धोऽग्रहादेव तदरिर्जातिजान् हन्ता अरिसिद्धः सुतान्हन्यादरिसाध्यस्तु कन्
का तन्न … सुतद्वृत्तीः सुसाधदरिः साधकायतः प्रसिद्धं यच्चैवाद्यं कि … नाम च यतीनां पुत्रानीनगुरुणा युक्तं न भवेत् नाम्नस्से सेवर्णानि विभक्तानि च कारयेत् अत्रापि लोके प्रसिद्धं नामाद्यमत्रापि (

ज्ञातथाकृतं हृष्टोजागर्तियेनासौ हृदस्थः कृष्णभाषते वदमन्यमन कोपितन्नामग्रामत्रनु हन्यामसेपि मातापितृकृतंनामयच्चापामजनेः कृतं विच्छिन्नंयस्यैवैवर्णैस्तस्य अजनभेदतः तृतीय(
मंत्रबीजानि ततः शोधनमाचरेत् सिद्धसुसिद्धकोपात्सानीयजिह्वांस्त्रिसंभवः संस्कृतोच्चारणश्चासमधिकात्तरमेवच अपभ्रंशात्तरं तुतोयत्कुत्सायलः हृसुख मंत्रान्तरेसदेकेकनामवर्णवशा
पनं कजेवेवर्जनान्यवसवैः साईस्वरास्तथा अः हा मासेनसेवा पंद्विनीयेनहिनीयक मेबेवापथवाना सिवार्णाः स्युर्विषमायसा नदामन्त्रसमारभ्यसमयान्तत्त्रयीज्ञेयम् आद्यंतयोः सिद्धवर्णाम
चेषसिन्वरान्तने अचिरेतोवकालेनसमचेत्स वेसिद्धिदः साध्यानाः सिद्धतोयस्तुतिकेकुलसिध्यति आदावतेस्तु सिद्धस्तुसर्वकामविभूतिदः आद्यंतेरिपुर्यस्यमंत्रःजपःसमंत्रकः स्यान्तद्रूपस्
तारिर्युमित्रश्चमसमेमतः फलंभवतियद्योमध्येसिद्धस्तदंतकेसाध्यः कष्टेनतावसिद्धिस्तस्यफलस्वल्पमेवनभवेत् अतेयदिमंत्रतुरिपुः अथमेमुध्येवसिद्धसाध्ययुगं कार्यचिंतितिनस्यात्रशान्यपदिमसमेतो
यसिद्धस्तसिद्धमंवरिपुमंत्रस्थपरिवयेद्यत्नात् वक्ष्यामसज्वलितंमंत्रंपरिवर्जयेन्माहिमानु नारायणीयेपि दुष्टार्णप्रचुरोयःस्यान्मंत्रःसचविनिन्दितः इतिअकथारुचक्रम् अहंतोभवनाचत्रयोविः प्र वर्णाः ऋमान्नस्वरान्तो
सयमेतितः अनेःस्थंतविजानीयाभदन्योवर्गउच्यते अथमारचक्रम् प्राप्तलोमपुरप्राणेहद्रस्पीत्ररुसः करं लोकलोपपद्रुमायस्वलौयोगे गुभेदिनाः वर्णाः कमान्नवराग्योत्रेवमभागतोनदा अस्यः हान्तौतुरेवतीमता =
कचटतपयवर्गास्तासंख्यापाः अमेषामात्रकावर्णानतत्रविज्ञानाभवंति अश्विन्यादिः अश्वः तान्यांसत्स्योलतो इतिवर्णास्त्वयारेवत्यायनेमात्रकावर्णाः क्रमेणाकेवशेयाः तेनश्रापत्स्यादिषु रपलभय
टरयरथयरदकरलकलपपटरयरवलाहराणा केकत्रिचतरेकेकद्यकद्विद्येकद्विद्विद्येकद्विअकयेकैकेकद्येकद्वित्रिचतःसंज्ञाः क्रमेण अन्यवर्णानुरूपरलोर्ध्वमेवसंयुक्तान्तरेषुपरात्तरेमेव
शाष्यमितिसंप्रदायः तस्मात् अश्वाअश्विनी इभरणी ईउऊकृत्तिका ऋरॠलृलॄरोहिणी एमृगशिराः ऐआर्द्रा ओऔपुनर्वसू कंपुष्यः खगअश्लेषा घङमघा चपूर्वफाल्गुनी छजउफा:
झञ हस्त टठचित्रा डस्वाति ढणविशाखा तथदअनुराधा धज्येष्ठा नपफमूल बपूषा भउषा मश्रवणं यरधनिष्ठा लशतभिषा वपूभा शसहउभा अंअः रेवती साधकातत्सम
जातरथर्थमित्रगणयेत् जन्मसंपद्विपत्क्षेमप्रत्यरिःसाधकोवधः मित्रंपरममित्रंच जन्मादीनिपुनःपुनः विपद्वधःप्रत्यरिःस्युःपरिसाधयामनोविभिः इतिनारचक्रम् कादशारेलिखेत्कवर्णानकादि
नःक्रमात् गणयेत्सिद्धसाध्याद्विफलंनेषांविनिर्दिशेत् सिद्धःसिध्यतिकालेनसाध्यस्तुजपहोमतः सुसिद्धःप्राप्तिमात्रेणसाधकंभक्षयेदरिः सिद्धेनवेकवाक्येपुसाध्यारसदशांतिषु सुसिद्धसिद्धे
षुनीकोपुरिपुर्वदाहमारणेषु अर्धचक्रगतास्तुलविषयमात्रपयकम् इतिअकडमचक्रम् अथकुलाकुलचक्रम् कलाकुलपरीक्षार्थकारःकथ्यतेधुना वाय्वग्निभजलाकाशाःपंचाशत्लिपयःक्र
मात् पंचकस्थाःपंचदीर्घाविन्दुनाः संधिसंभवाः पंचराःकादयःक्षिलसहान्ताःसमीरिताः साधकस्यतुरंससर्वमंत्रस्यापिनदक्षरं यद्यःकस्यतदक्षंजानीयात्कुलाकुलचनत पार्थिवेवारुणेमित्रमाग्ने
यरिपुमारुतम् पार्थिवात् जलतावाणावायुर्वैमारुतेमतम् आग्नेयस्यापिसमानुरंमसशोजमःस्मृतः दशानामपिवर्णनां सामविरोधितुनाभसं परस्परविरुद्धानानकुर्यान्मेलनंबुधः अत्रकथाधोद
पाकोदेशु पंचधाक्रमेणौतेवर्णाभवन्ति अआएकचटतपयषाविवायवाः इईऐखछठथफरक्षाअग्नेयाः उऊओगजडदबलला पार्थिवाः ऋॠओघझढधभवसाजलीयाः लृलॄअंअःङञणनमशहा
नाभसाकाशाः स्युः इतिपंचभूतात्मकः इतिकुलाकुलचक्रम् अथषट्पदचक्रम् षट्पदंचक्रमालिख्यप्रागादिषुदलेषुच अकारादिवर्णानेकैकंलिखेत्तिः षड्कुटकान् स्वनामाद्य(
दारंयग्रतदारभ्यविचारयेत् उदितेसंपद्धिहादिवितीयेसंपदायः तृतीयेतुधनंविद्याच्चतुर्थेबंधुविग्रहः पंचमेसमायात्सासात्स्वष्ठःसर्वविनाशकः इतिषट्पदचक्रम् अथगणगणचक्रं(
हस्तस्वातीश्रुतिमृगपुष्पमैत्राश्विरेवतीपुनर्वसुजेनुरितिभानिदेवानिमात्रिका: स्वीनराय्यंचाद्रीभरणीरोहिणीतथा मत्यीकृयगणः प्रोक्तोभान्येतानिविशारदेः चित्राश्लेषामूलमघाध(
निष्टाज्येष्ठकेतथा वरुणंकृत्तिकेन्द्राभीक्षोगणाडदाह्नतः एकयोरुत्तमाप्रीतिर्बपुंसोस्तुमध्यमा देवैर्मर्त्यैश्चमिकृदलसोवैरमुच्यते एवंबुधाबुधोमंत्रीविधिनामनियोजयेत् तत्राश्विनीमृगपुन
र्वसुहस्तस्वात्यनुराधाश्रवणरेवत्योदेवगणाः भरणीरोहिणीपूर्वत्रियुत्तरत्रयमनुष्यगणाः अन्येराक्षसगणाः एकगणस्ययोःप्रीतिरुत्तमा देवपुंसोर्मध्यमा उभाभ्यांरक्षसोवैरं साधकमंत्रा
यक्षरतोज्ञेयं इतिगणचक्रम् अथयोनिकपरिपदंबहुधाभड्रमेषौततोमूषककरादबुधौः क्रमशातोयिमहिषीद्वाद्वीतुःसौरभीव्याघ्रेलोमगमंडलौकपिरयोवनुहयवानराःसिंहम्पोसु
राद्यभमुअश्वकरन्तीयोनि स्तुभालामिथंतुगयसुविडालःसौरम्यौमहिषीमंडलःस्याबभ्रुर्नकुलःकरटीहस्तीविरोधस्तुगोव्याघ्रगजसिंहमश्वमहिषंश्वेणचबभ्रूरगंवैरंवानरमेषकंचतथैम
तन्मार्जारमूषकंतथा लोकानांयववतारकोप्यदपिचतान्येति इतियोनिचक्रम् अथकलिचक्रम् अग्निमायेलिखेद्धृत्तपीकारंत्रिनाडिकं त्रिनाडीवेधनतत्रमभिन्नप्राभृतिमतोत्तरा हस्तेन्दुम
साधकाय लवारुणपःस्वातीभाद्रपदोत्तरायाम्यःसौम्योगुरुर्योनित्राग्नितिजलादश्चधनिष्ठाचोत्तराधन्वमधनाडीषुवस्थिताः कृत्तिकारोहिणीसर्पमघास्वातीविशाखिके उत्तराश्रवणंपोलाषढनाडीयु
वस्थिताः येनिःस्वातीपात्सुलीजलाभ्यद्वेचाद्रा एकनाडीस्थितायस्यगुरुमंत्रःसदेवता तत्रदेवमृत्युमेलनकलमादिशेत् तत्रास्थिताद्रापुनर्वसूनरफाल्गुनीहस्तज्येष्ठामूलशतभि
न्य षाहर्वभाद्रपदाप्रथमनाडीस्था भरणीमृगशिरःपुष्यपूर्वफाल्गुणीचित्रानुराधाधनिष्ठोत्तरभाद्रपदामध्यनाडीस्था कृत्तिकारोहिण्यश्लेषामघास्वातिविशाखोत्तराषाढाश्रवणरेवत्यःस्वस्थ
नाडीस्था एकनाडीस्थागुरुमंत्रसाधकानिषिद्धाःस्मृताः इतिनाडिचक्रम् अथाष्टवर्गचक्रम् वर्गाष्टसिंहमासस्यमंत्रंदद्यात्तुजौतमः अवर्गःपक्षिणेज्ञेयामार्जारस्तुकवर्गगःच
वर्गस्तुतथासिंहष्टवर्गेश्वकुक्कुरः तवर्गेनागदेवश्चलोमूषकःस्मृतपवर्गकः यवर्गेमृगजेशेयोमार्जारेपाजमेषकः गरुडभुजंगयोर्वैरंनथाचगजसिंहयोः मार्जारमूषयोर्वैरंनथाकुक्कु(
२ रमेषयोःभुजंगसिंहयोःसैश्रीमेषमूषकयोस्तथा लोकादन्यत्रविज्ञेयंमावदातरपयोगतः इत्यष्टवर्गचक्रम् अथऋणधनचक्रम् धनादिकंविदित्वातुमनोसिद्धादिकेपिच प्रवर्ति

द्वे=

त्रयस्त्रिंशत्कोष्ठेषु नवांधीमस्त्रिवैष्णुस्वंप्पयततोन्यथा द्वितीन्नरायतं कुर्यात्तु त्र्यंपंचकमुत्तमं आक्रम्य गायताश्चैव भानुरेखाः प्रकल्पयेत् द्वौद्वौ स्वरौ लिखेद्विद्वान्पंचकोष्ठेषु पापरान् पश्चैकमेकमालिख्य कादिलान्तं ततो दरं
२ एकैकमेकादशस्वैकेषुमतिमालिखेत् दिग्भूमिश्रीमूर्तिनज्ञाराम्रश्रीषट्‌द्विषद्वचिके: गुणयेत्साधकस्यार्णानस्वरव्यंजनभेदिनान् इदं नक्षत्रनयनरविपंचेदष्टार्णुभि: अस्त्रप्यायुधनागेन्द्रनवभिस्तथा मनो:
नामार्णकोष्ठकमध्ये आयंतनिकृत्तं क्रमात् हन्याकोष्ठगुणेनैव पंचवर्ग पंचमिर्थ्या एवं पर्यंचसत्त्वा लेशुलकोकाः समासतः सरूपमीननरोष्यानभावकामाथजादरे मंत्रवर्गेषु तत्र तत्र गत्वा मानुनिम्नगा नामाकु
रा·दी·प· लादकठवादष्टमक्रादिकं द्रुधे: ज्ञात्वाभयोऋणं क्रियादधिकंमोर्क्षमंकविन् उक्तं च वक्तुभिर्भागमारुरेडभयोरपि वाङल्पयत्रदष्टेनसौधमर्णः प्रकीर्तितः धार्यतेयस्यबेमन्त्रैः शत्रीयाना मन्तु सर्वे नदमावेत
मधनेधनिकेनकदाचन अन्येस्तुविजानीयात्तस्मात्क्वंपरित्यजेत् अस्यार्थ: साध्याणां स्वरव्यंजनरूपेणपृथक्कृत्य नधासाधकनामनक्षत्रपीत्र्यायंकालत्रद्दर्णस्यकोष्ठगुणलकृत्वानद्येवदिगाद्यंकानपि
२ कुर्यात् नाम अचुरुलादिति स्वरव्यंजनसमुदायात् अकठवादिवर्गचतुष्टयप्रभिन्नात् अइउऋलृएऐओऔअंअ: अवर्ग: कादिणान्त: कवर्ग: तादिफान्त: छवर्ग: बादिसान्तो बवर्ग: एतत्पकादशे का
दशान्तराश्वत्वारो वर्गा: अस्मात् अकठवात् अष्टभिर्भागेहृते सति इभयोरपि साध्यसाधकवर्गयो: शेषस्याधिकत्वस्य ऋणत्वमल्पस्य धनित्वं तेषां एवं पर्यंचसत्त्वा इतिसार्द्धश्लोकस्यायमर्थ: २।३।५।७।१।२।४।६।८
एवं कुसेलसमासतः संदेपेलपर्यंचसत्त्वा: कलिना: समासतः संदेपेण कुलकाकाः अत्राद्यसंकेतः इत्याद्यंकालत्रद्दर्णस्यकोष्ठसंख्ययागुणितानामष्टभिर्हृतानां कृत्वा अवशिष्टाका: कुहेमीननरोषा
नमभवकोसाधकान्तरेकुलकामवंति दिगाद्यंकानपि नत्रद्दर्णकोष्ठसंख्ययागुणितानां अष्टभिर्हृतानां वा अवशिष्टाकाः नत्रत्रत्रगच्छमानुनिम्नगामंत्राद्रेकुलकाकामवंति एकमेवं नक्रमत्वंवप
शोकोवद्यमालोत्रेय: एतेनबहुकालेनाप्यनंतस्वद्यमालोचक्रमुद्धतं इति ऋणधनचक्रम् अथापरमृणधनचक्रम् षट्कालकालविषदग्निसमुद्रवेदाः खोकाशाब्धयदश्च: स्वलुसाध्य
र्णाः सुगमष्ट्यंचधियदंवरमुक्ता अंकयोमाद्विवेदमाप्तिन: साधकार्णाः नामाद्युकुलादकठवाकजभक्रमेण बंधा तयोर्मयोरधिकमोघमृणं धनं स्यात् अस्यार्थ: षडाद्यंके: साध्याणां स्वरव्यंजनरूपेणपृथक्कृ
तान्कृत्वा तथासाधकनामाक्षराणि दिष्वग्न्यादिभिरंकैर्गुलयेत् शेषमर्वदं ऋणं पालनेनकस्मिद्दिशो: इति ऋणधनचक्रम् अथकादिमते ऋणधनचक्रम् नामाद्यक्षरमारभ्य यावन्मंत्रादिवर्णकं त्रिधा कृ
स्वरो= नात्रभिन्नयात्तदनन्तद्विपरीतकं कृत्वाधिकस्तेणं ज्ञेयमृणी चेन्मंत्रउत्तमः स्वयंऋणीचेत्मंत्रस्तदा नन्मंत्रसजोत्सर्वंमृणीयत: अत्रनामाद्यक्षरंसाधकस्यनामाद्यक्षरमारभ्य मंत्राद्यक्षरपर्यंतगणनेनसाधकराशि: मं
त्राद्यक्षरादिसाधकनामाद्यक्षरपर्यंतंगणनेमंत्रराशि: साध्यनामाद्यक्षरमारभ्य विपरीतंगसाधकुनामाक्षरंयावत्त्रिभिर्गुणयित्वास्वरै: सप्तभिर्विभजेत् शेषं पूर्ववत् अपरोपिप्रकार: साध्यमंत्रद्विगुणितंसा
धकेनसमन्वितं अष्टभिश्च हरेच्छेषं तदन्यद्विपरीततं अस्यार्थ: मंत्राक्षराणिस्वरव्यंजनरूपेणपृथक्कृत्यानि द्विगुणितेन साधकनामाक्षराणिपिस्वरव्यंजनरूपेणपृथक्कृतानि तेनसंयोजयेत् ततोष्ट इयङ्क ४
भिर्हरेत् अयंमंत्रराशि: एवं साधकनामाक्षराणि स्वरव्यंजनरूपेणपृथक्कृत्वागतरै: संयोज्यतान्यष्टभिर्हरेत् एवं साधकराशि: एवं यस्योत्तमर्णोऽयो मंत्र: स्वत
शोधनं= स्त्वानिष्ट: यस्ययश्चाधमर्ण: सतत्सेव्ष्ट: इति ऋणधनचक्रम् अथ हरचक्रम् चक्रभेदे हरचक्रं षड्दलंचसिद्धादिचक्रमेवच राशिनक्षत्रचक्रे च लसत्कुलाकुलमेवच अकडमचाकठवं वर्गचक्रं तथैव च उ
क्तानि नवचक्राणि मंत्रसिद्धिकराणि च नवचक्रविमृज्या मंत्री शोभीष्टायकल्पते गणचक्रविचारोपिकैश्चित्संमत: प्रिये अथात: संप्रवक्ष्यामि हरचक्रंमहोदयं यज्ज्ञात्वा तान्त्रिको लोके आप्नोते मंत्रविजनम: आत्रयाव
ज्जीयेत्संत्रसिम्याष्टभगवान्शिव: तस्मात्सर्वप्रयत्नेनधः सुधी: परिचारयेत् ऊर्ध्वाद्वेरेखेतुदेवानांनारकोष्ठमुसनिभं तन्मध्येविभजेत्कोष्ठे चतुष्कं कुलचक्रं तारकोष्ठद्राष्टिकोष्ठे नेनदिक्तुचतु:कोष्ठानि विदिक्षु च तु:
कोष्ठानि मध्ये कोष्ठमेकं विदिग्गतकोष्ठचतुष्केतत्र चतुष्कं पातयेत्तेनद्वादशकोष्ठात्मकं राशिचक्रंभवति पातयेद्दिक्षुचर्णीववाणितारांसैरंवी कर्णोक्तत्रमयो भयत ईशानादिषुयोजयेत् त्रिपुरांभुवनेशीं च
पीठेशीं चैवत्र्यंवकं वामदेवं श्रियं चैवच्छिन्नमस्तां च चंडिकां ईशानाद्यं शिवस्तत्क्रमस्तावत्तवा विनातथा इन्द्रादीं चैवदिकं वं पितामहमनंतरं मत्तमायां च कालीं च मदन्यत्सोमदैवतं ईशानाद्यमिति ईशानकोणमा
रभ्य क्रमेणेत्यर्थ: पंचाप्याद्विलिखेद्दर्णीनीषाकोष्ठादित्क्रमात् अत्र कमपदे नदिग्गतकोष्ठानामिह ग्रहणं अग्निंस्थक्रमानापिन्न कृतमेवनामग्राह्यं नतुसमोषेनवुञाते तच्चक्रांतरवर्गनवं नामार्णतुसमारभ्य या
वद्वाणीगोचरं संस्कृत्योग्रहणं कुर्याद्युक्तेनकदाचन धनं पुत्रं चलाभं च निधनं चैव विक्रलं मुक्तिं सौख्यं च धर्मं च अरिं मित्रं च कामदं मीष्ठांश्चिंतयेत्कोष्ठे हरचक्रमिमीरितं अत्रापि ईशानदक्षिणक्रमः इति ह
रचक्रम् अथात्र प्रवाद: नीलतंत्रे ताराद्वितत्त्वादिमंत्रमधिकृत्य नात्रसिद्धाद्येतानि न चामित्रादिदूषणं एवं च एकादशेन तथा कूटे त्रैपुरेमंत्रनायके स्त्रीदत्तेस्वमलब्धे च सिद्धादींश्चैव शोधयेत् मंत्रैसिद्धे
पदिष्टे च तथा राज्यजेस्वपि मालामंत्रेषु देवेशि सिद्धादींश्चैव शोधयेत् मालामंत्रस्तु विंशाक्षरात्परिक: नृसिंह कवराहतारासादप्रणवस्य च संपिंडाक्षरमंत्राणां सिद्धादीन्न विचारयेत् प्रणवस्त्रतुरीमायाव्योमवापीक्षरः
प्रासादो बहुरूपात्समस्साधारणोऽस्य ता: सौरमंत्राश्च ये पि स्मृताराहानारसिंहका: सिद्धसाध्यसुसिद्धारिविचारपरिवर्जिता: संपिंडाक्षरमंत्राणां वैदिकानां च मवेश्रा: नपुंसकस्य मंत्रस्य सिद्धादींन्न शोधयेत् निमाना
त्रेपराणांपनत्वेस्वास्त्वेराकादय: नथापिप्रोच्यते किंचिद्विचाराद्विशेषण मेऋशाकाद्योल्पादिकाश्चार: तानप्रयेणार्थिनां वादादिमंत्रयः दूरोपिकोष्ठादिशोधनमायाति तन्न्कोधननिषेधस्यमीतादिमात्रपरत्वाद्गत
म्या इति मंत्रशोधनविचार: अथ कातिचिन्मंत्रालिख्यन्ते तत्रादौ भुवनेश्वरीमंत्रा: ह्रीं शक्ति: ऋषि: गायत्री छंद: हकारो बीजं ईकार: शक्ति: रेफ: कीलकं भुवनेश्वरी देवता चतुर्वर्गसिद्ध्यर्थं जपे विनियोग: पुरश्च
रणं लक्षाणि ३२ पं ह्रीं श्रीं जपपुरश्चरणं लक्षाणि १२ चं ह्रीं ऐं श्रीं ह्रीं क्रों इति भुवनेश्वरी मंत्रा: ध्यानम् सिंदूरारुणविग्रहां त्रिनयनां माणिक्यमौलिस्फुरत्तारानायकशेखरां स्मितमुखीमापीनवक्षोरुहाम् ।
पाणिभ्यां मणिपूर्णरत्नचषकं रक्तोत्पलं बिभ्रतीं सौम्यां रत्नघटस्थसव्यचरणां ध्यायेत्परामंबिकाम् १ अथान्नपूर्णा ह्रीं नमो भगवति माहेश्वरि अन्नपूर्णे स्वाहा इयं श्री बीजाद्या वाग्बीजाद्या कामाद्या प्रणवाद्या मार २
याद्या ह्रीं श्रीं क्लीं मवीजाद्येति एतेषां ब्रह्मा ऋषि: पंक्तिश्छन्द: अन्नपूर्णा देवता पुरश्चरणं सहस्राणि १६ ध्यानम् रक्तां विचित्रवसनां नवचन्द्रचूडामन्नप्रदाननिरतां स्तनभारनम्राम् नृत्यन्तमिन्दुशकलाभर

लं विलोकयन् हां मजो ज्ञगवंतीभवकुः स्वहस्त्रीम् अथ त्रिपुरा ऐं क्लीं सौः ध्यानम् पारिजातवनेस्मिन्मंडपे मणिकुट्टिमे रत्नसिंहासने रम्ये पद्मे षट्कोणशोभिते अधस्तात्कल्पवृक्षस्य निषण्णां देवतां स्मरेत् संमोहन
ऋषिः गायत्री छन्दः त्रिपुरादेवता पुरश्चरणं लक्ष १२ अथ त्वरिता ओं ह्रीं हुं खे च छे क्षः स्त्रीं हुं क्षे ह्रीं फट् अस्या अर्जुन ऋषिः विराट् छन्दः त्वरिता देवता ध्यानं श्यामांगी बर्हिकलापशेखरयुतामाबद्धपर्णांशुका
गुंजाहारलसत्पयोधरभरामष्टाहिपान्बिभ्रतीम् ताटंकांगदमेखलागुणलसन्मंजीरतां प्राप्तितान्कैरातीं वरदाभयोद्यतकरां देवीं त्रिनेत्रां भजे पुरश्चरणं लक्ष १ अथ नित्या ऐं क्लीं नित्यक्लिन्ने मदद्रवे स्वाहा सम्मो
हन ऋषिर्नीवृच्छन्दः नित्या देवता ध्यानं अर्धेन्दुमौलिमरुणाममराभिवंद्यामम्भोजपाशवरसृणिलसत्पाणिकर्माम् रक्तांगरागवसनाभरणां त्रिनेत्रां ध्यायेच्छिवस्य वनितां मदविह्वलांगीम् पुरश्चरणं लक्ष ४ ऐं क्लीं नि
त्यक्लिन्ने मदद्रवे स्वाहा अस्य पुरश्चरणं लक्ष १ अस्य सर्वं पूर्ववत् अथ दुर्गा ओं ह्रीं दुं दुर्गायै नमः नारद ऋषिर्गायत्री छन्दः दुर्गा देवता ध्यानं सिंहस्था शशिशेखरा मरकतप्रख्या चतुर्भिर्भुजैः शंखं चक्रधनुःश
रांश्च दधती नेत्रैस्त्रिभिः शोभिता आमुक्तांगदहारकंकणरणत्कांचीक्वणन्नूपुरा दुर्गा दुर्गतिहारिणी भवतु नो रत्नोल्लसत्कुंडला पुरश्चरणं लक्ष १ अपरश्च महिषमर्दिनी स्वाहा अयं प्रलगादिः वा गवाद्यं पूर्वबीजादिक
वचादि स्तेन नवा तरो भवति एते कामसर्वं पूर्ववत् ध्यानेतु विशेषः गारुडोपलसन्निभां मणिमौलिकुंडलमंडितां नौमि भालविलोचनां महिषोत्तमांगनिषेदुषीम् शंखचक्रकृपाणखेटकबाणकार्मुकशूलकं तर्जनी
मपि बिभ्रतीं निजबाहुभिः शशिशेखरां ताम् पुरश्चरणं लक्ष ८ ओं दुं गें दुं गर्दति पिनि स्वाहा अस्य सर्वं पूर्ववत् ध्यानम् कालाभ्राभां कटाक्षैररिकुलभयदां मौलिबद्धेन्दुरेखां शंखं चक्रं कृपाणं त्रिशिखमपि करैरुद्वहन्तीं
त्रिनेत्राम् सिंहस्कंधाधिरूढां त्रिभुवनमखिलं तेजसा पूरयन्तीं ध्यायेद्दुर्गां जयाख्यां त्रिदशपरिवृतां सेवितां सिद्धिकामैः पुरश्चरणं लक्ष ८ अथ वागीश्वरी वद वद वाग्वादिनि स्वाहा क्लीं वद वद वाग्वादिनि स्वा
ह्रीं अस्य प्रस्कण्व ऋषिः विराट् छन्दः वागीश्वरी देवता तिलकस्य पुरुषार्थसिद्ध्यर्थे विनियोगः ध्यानं तरुणशकलमिन्दोर्बिभ्रती शुभ्रकान्तिः कुचभरनमितांगी संनिषण्णा सिताब्जे निजकरकमलोद्यल्लेखनीपुस्त
कश्रीः सकलविभवसिद्ध्यै पातु वाग्देवता नः पुरश्च० ल० १ ऐं नमो भगवति वद वद वाग्देवि स्वाहा अस्य ऋष्यादि पूर्ववत् ध्यानं शुभ्रां स्वच्छविलेपमाल्यवसनां शीतांशुखंडोज्ज्वलां व्याख्यामक्षगुणं सुधाढ्यकल
शं विद्यां च हस्तांबुजैः बिभ्राणां कमलासनां कुचनतां वाग्देवतां सस्मितां वन्दे वाग्विभवप्रदां त्रिनयनां सौभाग्यसंपत्करीम् अस्य पुरश्च० ल० ८ ओं ह्रीं ऐं ह्रीं ओं सरस्वत्यै नमः कण्वाख्यो ऋष्यादि पूर्ववत् ध्यानं वा
मीक्षणं निशाकरमुखीं कर्पूरकुन्दप्रभां चन्द्रार्धांकितमस्तकां निजकरैः संबिभ्रतीमादरात् वीणामक्षगुणं सुधाढ्यकलशं विद्यां च तुंगस्तनीं दिव्यैराभरणैर्विभूषिततनुं हंसाधिरूढां भजे पुरश्च० ल० १२ ऐं वाचस्प
ते अमृते प्लुवः प्लुः ऋष्यादि पूर्ववत् ध्यानं आसीना कमले करैर्जपवटीं पद्मद्वयं पुस्तकं बिभ्राणा तरुणेन्दुबद्धमुकुटा मुक्तेन्दुकुन्दप्रभा भालोन्मीलितलोचना कुचभरक्लान्ता भवद्भूतये भूयाद्वागधिदेवता मुनिगणै
रासेव्यमाना निशं पुरश्च० ल० ११ ऐं क्लीं सौः ऋष्यादि पूर्ववत् ध्यानं मुक्ताहारावदातां शिरसि शशिकलालंकृतां वाड्मयीं त्वां वर्णैस्त्वामालामयपुस्तककलशयुक्तां चोद्वहन्तीं आपीनोत्तुंगवक्षोरुहभरवि
नमध्यदेशां मधीशां वाचामीडे विराजत्त्रिभुवननमितां पुंडरीके निषण्णां पुरश्च० ल० १२ अथ पारिजातसरस्वती ओं ह्रीं ह्सौं ह्रीं ओं सरस्वत्यै नमः अस्य प्रस्ताव ऋषिः त्रिष्टुप् छन्दः पारिजातसरस्वती देवता ध्या
नम् हंसारूढा हरहसितहारेन्दुकुन्दावदाता वाणी मंदस्मितयुतमुखी मौलिबद्धेन्दुरेखा विद्या वीणामृतमयघटाक्षस्रजादीप्तहस्ता शुभ्राब्जस्था भवदभिमतप्राप्तये भारती स्यात् पुर० ल० १२ अथ लक्ष्मी श्रीं भृगुऋ
नृषि ५ षिर्निचृच्छन्दः श्रीदेवता ध्यानम् कान्त्या कांचनसन्निभां हिमगिरिप्रख्यैश्चतुर्भिर्गजैर्हस्तोत्क्षिप्तहिरण्मयामृतघटैरासिच्यमानां श्रियम् बिभ्राणां वरमब्जयुग्ममभयं हस्तैः किरीटोज्ज्वलां क्षौमाबद्धनितम्बबिम्बललितां वन्दे
ऽरविन्दस्थितां पुरश्च० ल० १२ सोमसहस्र १२ नमः कमलवासिन्यै स्वाहा दक्षिणामूर्तिर्विराट् छन्दः श्रीर्देवता ध्यानं आसीना सरसीरुहे स्मितमुखी हस्तांबुजैर्बिभ्रती दानं पद्मयुगाभये च वपुषा सौदामिनीसन्निभा मुक्ताहा
रविराजमानपृथुलोत्तुंगस्तनोद्भासिनी पायाद्वः कमला कटाक्षविभवैरानंदयन्ती हरिम् पुरश्च० ल० १ ओं श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं महालक्ष्म्यै नमः विनियोगस्तु राजीववत् ध्यानं सिन्दूरा
रुणकान्तिमब्जवसतिं सौंदर्यवारांनिधिं कोटीरांगदहारकुंडलकटीसूत्रादिभिर्भूषितां हस्ताब्जैर्वसुपत्रमब्जयुगलादर्शौ वहन्तीं परां आवीतां परिचारिकाभिरनिशं ध्यायेत्प्रियां शार्ङ्गिणः पुरश्चरणं लक्षम् १
अथ गणेशमंत्राः गं अस्य गणक ऋषिः नीवृच्छन्दः गणेशो देवता ध्यानम् सिंदूराभं त्रिनेत्रं पृथुतरजठरं हस्तपद्मैर्दधानं दन्तं पाशांकुशेष्टान्युरुकरविलसद्बीजपूराभिरामं बालेन्दुद्योतिमौलिं करिपतिवदनं
दानपूरार्द्रगंडं भोगीन्द्राबद्धभूषं भजत गणपतिं रक्तवस्त्रांगरागम् पुरश्च० ल० ४ श्रीं गं श्रीं महागणपतये स्वाहा अस्य गणक ऋषिः निचृद्गायत्री छन्दः गणाधिपो देवता ध्यानं रक्ताम्भोरुहमदजलमुखं चन्द्रचूडं त्रिनेत्रं
हस्तैः स्वैर्दधानमरविंदांकुशोरस्तकुंभं अंकस्थायाः सरसिजकरसक्ताः कुचालं विपाले दत्वा योनौ विनिहितकरं रत्नमौलिं भजामः पुरश्च० ल० ४ अथ हेरम्बः ओं गूं नमः गणक ऋषिः गायत्री छन्दः हेरम्बो देव
ता गं बीजं विघ्नशक्तिः ध्यानं मुक्ताकांचननीलकुन्दघुसृणच्छायैस्त्रिनेत्रान्वितैर्नागास्यैर्हरिवाहनं शशिधरं हेरम्बमर्कप्रभम् दृप्तं दानमभीतिमोदकरदान् टंकं शिरोऽक्षात्मिकां मालां मुद्गरमंकुशं त्रिशिखरं दोर्भिर्दधानं भ
जे पुरश्च० ल० ३ ओं हस्तिपिशाचिलिखे स्वाहा अस्य मधीर ऋषिः नीवृच्छन्दः उच्छिष्टगणपतिर्देवता पुरश्च० ल० ४ उच्छिष्टगणेशाय महाप्रसादनायनमः गणक ऋषिः विराट् छन्दः तिप्रप्रसादनो देवता ध्या
नं पाशांकुशौ कल्पलतां विषाणं दधत्स्वशुंडाहितबीजपूरः रक्तस्त्रिनेत्रस्तरुणेन्दुमौलिर्हारोज्ज्वलो हस्तिमुखोऽवताद्वः पुर० ल० १ ग्लौं वशिष्ठ ऋषिः गायत्री छन्दः विघ्नगणपतिर्देवता गं बीजं लं शक्तिः हरिद्राभं चतु
र्बाहुं हारिद्रवसनं विभुं पाशांकुशधरं देवं मोदकं दन्तमेव च ध्यानं वरदं देवं हरिद्रागणपं विभुम् पुरश्च० ल० ४ श्रीं लक्ष्म्याद्यं कूर्चाद्यं वा मायाद्यं वा ओंकाराद्यं निजबीजाद्यं वा प्रत्यगीचमन्त्रविद्यामन्त्रं १
वास्तु संपुटितं चतुर्वर्णात्मिकां वह्निजायावधि भवेत् अथ सूर्यः ओं घृणिः सूर्य आदित्य देवभाग ऋषिः गायत्री छन्दः आदित्यो देवता ध्यानं रक्तांबुजाभिवरदानकरोज्ज्वलांगं केयूरहारांगदकुंडलाढ्यं बंधूककान्तिवि
लसत्त्रिनेत्रं माणिक्यमौलिं दिननाथमीडे पुरश्च० ल० ८ ह्रीं घृणिः ध्यानं रक्ताम्बुजासनमशेषगुणैकसिन्धुं भानुं समस्तजगतामधिपं भजामि पद्मद्वयाभयवरान्दधतं कराब्जैर्माणिक्यमौलिमरुणांगरुचिं त्रिनेत्रम्
अथ शिवः ५ पुरश्च० ल० ५ हंसः प्रसाद ऋषिः गायत्री छन्दः गिरिजापतिर्देवता उद्यद्भानुस्फुरितनतडिदाकारमर्धाम्बिकेशं पाशाभीतिं वरदपरशुं संदधानं कराब्जैः दिव्याकल्पैर्नवमणिमयैः शोभितं विश्वमूलं सौम्याग्ने
यं वपुरवतु वश्चन्द्रचूडं त्रिनेत्रम् पुरश्च० ल० ९ अथ विष्णुः ओं नमो नारायणाय नारायण ऋषिः गायत्री छन्दः विष्णुर्देवता ध्यानं उद्यत्कोटिदिवाकराभमनिशं हेमाब्दाभं पार्श्वद्वये जलधिसुतया विश्व
धात्र्या च जुष्टम् नानारत्नोल्लसितविविधाकल्पमापीतवस्त्रं विष्णुं वन्दे दरकमलकौमोदकीचक्रहस्तम् पुरश्च० ल० १६ अथ रामः ओं रां रामाय नमः ब्रह्मा ऋषिः गायत्री छन्दः श्रीरामचंद्रो देवता ध्यानं कालाम्भोधर
कान्तिकान्तमनिशं वीरासनाध्यासितं मुद्रां ज्ञानमयीं दधानमपरं हस्ताम्बुजं जानुनि सीतां पार्श्वगतां सरोरुहकरां विद्युन्निभां राघवं पश्यन्तं मुकुटांगदादिविविधाकल्पोज्ज्वलांगं भजे पुर० ल० ९ अथ षडक्षरः क्लीं रामाय
नमः क्लीं रामा० रामाय० श्रीरामाय० ओं रामाय० ब्रह्म संमोहनम् ... अथ कामबीजादेर्मन्त्रविश्वामित्र ऋषिः गायत्री छन्दः एतेषां सर्वं पूर्ववत् ॥

अथ श्रीकृष्णः क्लीं गोपीजनवल्लभाय स्वाहा दशाक्षरमन्त्रविद्यास्य नारद ऋषिर्विराट् छंदः श्रीकृष्णो देवता क्लीं बीजं स्वाहा शक्तिः ध्यानम् फुल्लेन्दीवरकान्तिमिन्दुवदनं बर्हावतंसप्रियं श्रीवत्सांकमुदारकौस्तुभ
धरं पीतांबरं सुन्दरम् गोपीनां नयनोत्पलार्चिततनुं गोगोपसंघावृतं गोविंदं कलवेणुवादनपरं दिव्यांगभूषं भजे पु·ल·१२ ॐ नमो भगवते वासुदेवाय प्रजापतिऋषिर्गायत्री छंदः वासुदेवो देवता ध्यानं विष्णुं शारदचन्द्रकोटिस
दृशं शंखं रथांगं गदामंभोजं दधतं सिताब्जनिलयं कान्त्या जगन्मोहनम् आबद्धांगदहारकुण्डलमहामौलिं स्फुरत्कंकणं श्रीवत्सांकमुदारकौस्तुभधरं वन्दे मुनीन्द्रैः स्तुतम् पु·ल·१३ ॐ नमो विष्णवे सुरपतये महाबलाय स्वाहा
इन्द्र ऋषिर्विराट् छंदः विष्णुर्वामनो देवता ध्यानम् मुक्तागौरं नवमणिलसद्भूषणं चन्द्रसंस्थं भृंगाकारैरलकनिकरैः शोभिवक्त्रारविंदम् हस्ताब्जाभ्यां कनककलशं शुद्धतोयाभिपूर्णं दध्यन्नाढ्यं कनकचषकं धारयन्तं भजामः ।
गा·दी·प· पु·ल·२ अथ हयग्रीवः ॐ उद्गिरत्प्रणवोद्गीथ सर्ववागीश्वरेश्वर सर्ववेदमयाचिन्त्य सर्वं बोधय बोधय ब्रह्मा ऋषिरनुष्टुप् छंदः हयग्रीवो देवता ध्यानं शरच्छशांकप्रभमश्ववक्त्रं मुक्तामयैराभरणैः प्रदीप्तं रथांगशंखो
४ द्यतबाहुयुग्मं जानुद्वयन्यस्तकरं भजामः पु·ल·२४ अथ नरसिंहः उग्रवीरं महाविष्णुं ज्वलन्तं सर्वतोमुखम् नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहम् ब्रह्मा ऋषिरनुष्टुप् छंदः श्रीनृसिंहो
देवता ध्यानम् माणिक्याद्रिसमप्रभं निजरुचा संत्रस्तरक्षोगणं जानुन्यस्तकरांबुजं त्रिनयनं रत्नोल्लसद्भूषणम् बाहुभ्यां धृतशंखचक्रमनिशं दंष्ट्रोग्रवक्त्रोल्लसज्ज्वालाजिह्वमुदग्रकेशनिचयं वन्दे नृसिंहं प्रभुं पु·ल·३२ क्ष्रौं
अत्रिऋषिर्गायत्री छंदः हकारो बीजं ॐ शक्तिः नृसिंहो देवता वह्नीषोमसूर्यनेत्रं नागकल्पितं ध्यानम् कोपारक्तोल्लजिह्वं विकटनिजदृढदंष्ट्रासकृद्घोषितेत्रं पातालब्रह्मशीर्षं प्रभवसुपरिमितं तप्तहेमाभगात्रम्
चक्रं शंखं गदाब्जं ह्यभयदवरदौ दोर्भिरष्टाभिरन्तर्विभ्रत्संत्रस्तविश्वं नरहरिमनिशं नौमि विद्यापकल्पम् ईश्वरं सिंहम् पु·च·ल·३ हौं महासुदर्शनः ॐ श्रीं ॐ ह्रीं करुणाशयाय नृसिंहाय नमः ब्रह्मा ऋषिरनुष्टुप् छंदः हरि
हरो देवता ध्यानं कल्पवृक्षपादजन्यमणीनिन्दधनकैः रत्नमयगाणवीताईदेहं हरिं हरं भजे पु·च·ल·१ अथ वराहः ॐ नमो भगवते वराहरूपाय भूर्भुवः स्वः पतये भूपतित्वं मे देहि ददापय स्वाहा भार्गव ऋषिर
नुष्टुप् छंदः आदिवराहरूपः श्रीविष्णुर्देवता ध्यानम् आपादजानुदेशाद्वरकनकनिभं नाभिदेशादधस्तान्मुक्ताभं कण्ठदेशात्तरुणरविनिभं मस्तकान्नीलभासम् ईडे हस्तैर्दधानं रथचरणदरौ खड्गखेटौ गदाख्यशक्ति
दक्षिणामूर्तिः नागेन्द्रः शेषः मीतिहरमन्त्रः= दानान्यथैवं तिति धरणिं लमहेदमाद्यं वराहम् पु·ल·८ अथ शिवः हौं वामदेव ऋषिः पंक्तिश्छंदः शिवो देवता मुक्तापीतपयोदमौक्तिकजपावर्णैर्मुखैः पंचभिस्त्र्यक्षैरंचितमीशमिन्दुमुकुटं पूर्णेन्दु
कोटिप्रभम् शूलं टंककृपाणवज्रदहनान्नागेन्द्रघंटांकुशान्पाशं भीतिहरं दधानममिताकल्पोज्ज्वलांगं भजे पु·ल·५ ॐ जूं सः कहोल ऋषिर्गायत्री छंदः श्रीमृत्युंजयो देवता ध्यानम् चन्द्रार्काग्निविलोच
नं स्मितमुखं पद्मद्वयान्तःस्थितं मुद्रापाशमृगाक्षसूत्रविलसत्पाणिं हिमांशुप्रभं कोटीरेन्दुगलत्सुधाप्लुततनुं हाराद्रिभूषोज्ज्वलं कान्त्या विश्वविमोहनं पशुपतिं मृत्युंजयं भावये पु·ल·३ ॐ नमो भगवते दक्षिणामूर्तये
वटुकदमसोक्रायाधो ४ मह्यं मेधां प्रयच्छ स्वाहा चतुर्मुख ऋषिर्गायत्री छंदः दक्षिणामूर्तिर्देवता स्फटिकरजतवर्णं मौक्तिकीमक्षमालाममृतकलशविद्याज्ञानमुद्राः कराब्जैः दधतमुरगकक्ष्यं चन्द्रचूडं त्रिनेत्रं विधृतविविधभूषं दक्षि
णामूर्तिमीडे पु·ल·१ नमः शिवाय ॐ नमः शिवाय अघोर ऋषिः पंक्तिश्छंदः ईशानो देवता ध्यानम् ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं रत्नाकल्पोज्ज्वलांगं परशुमृगवराभीतिहस्तं प्र
सन्नम् पद्मासीनं समन्तात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं विश्वाद्यं विश्ववंद्यं निखिलभयहरं पंचवक्त्रं त्रिनेत्रम् पु·ल·२६ हेमः महत्वे २९ श्रीवटुकायापदुद्धारणाय कुरु कुरु वटुकाय ह्रीं हरहारतपवज्रे
त्रिगायत्री छंदः वटुकभैरवो देवता पु·ल·२१ अथ भैरवी हसरैं हसकलरीं हसरौं ब्रह्मा दक्षिणामूर्तिऋषिः पंक्तिश्छंदः त्रिपुराभैरवी देवता ऐं बीजं सौः शक्तिः कामराजः कीलकम् ध्यानम् उद्य
द्भानुसहस्रकान्तिमरुणक्षौमां शिरोमालिकां रक्तालिप्तपयोधरां जपवटीं विद्यामभीतिं वरम् हस्ताब्जैर्दधतीं त्रिनेत्रविलसद्वक्त्रारविंदश्रियं देवीं बद्धहिमांशुरत्नमुकुटां वन्दे समन्दस्मिताम् पु·ल·१·लो·स·१२
अथ बाला ऐं क्लीं सौः ऋष्यादिः सर्वं पूर्ववत् पु·ल·३ अथ त्रिपुरसुंदरी ॐ ह्रीं क्लीं श्रीं ऐं क्लीं सौः श्रीं ह्रीं क्लीं ऐं सौः ॐ ह्रीं श्रीं दक्षिणामूर्ति ऋषिः पंक्तिश्छंदः त्रिपुरसुंदरी देवता वाग्भवो बीजं कामरा
अग्रे = जः कीलकं ध्यानं बालार्कमण्डलाभासां चतुर्बाहुं त्रिलोचनां पाशांकुशशरांश्चापं धारयन्तीं शिवां भजे पु·ल·१ श्रीं ह्रीं क्लीं ऐं सौः ॐ ह्रीं श्रीं कएईलह्रीं हसकहलह्रीं सकलह्रीं सौः ऐं क्लीं ह्रीं श्रीं इयं का ६४
मराजसहिता अथ प्रचण्डचण्डिका श्रीं ह्रीं क्लीं ऐं वज्रवैरोचनीये हूं हूं फट् स्वाहा श्रीं ह्रीं हूं ऐं वज्रवैरोचनीये हूं फट् स्वाहा ॐ श्रीं ह्रीं क्लीं ऐं वज्रवैरोचनीये ह्रीं ह्रीं फट् स्वाहा आद्यमन्त्रमस्तोदधौ भैरव
ऋषिः सम्राट् छंदः प्रचण्डचण्डिका देवता हूं बीजं स्वाहा शक्तिः स्वनाभौ नीरजं ध्यायेदिति पु·ल·१ अथ कालीतारा ह्रीं २२ क्रीं १ नाममन्त्राः उग्रतारा ५ एकजटा ४ नीलसरस्वती ३ सिद्धकाली ॐ क्रीं क्रीं
क्रीं मे स्वाहा भैरव ऋषिः विराट् छंदः सिद्धकाली देवता ध्यानं खड्गोद्भिन्नेन्दुबिम्बस्रवदमृतरसाप्लाविताङ्गी त्रिनेत्रा सव्ये पाणौ कपाले गलदसृजमथो मुक्तकेशी पिबन्ती दिग्वस्त्रा बद्धकाञ्चीमणिमययमुकु
टाद्येर्युता दीप्तजिह्वा पायान्नीलोत्पलाभा रविशशिविलसत्कुण्डला लीढपादा भुक्त्य॰ लक्षं २२ क्रीं ३ हूं २ ह्रीं २ गुह्यकालिके क्रीं हूं २ ह्रीं २ स्वाहा क्रीं ३ हूं २ ह्रीं २ भद्रकालिके क्रीं ३ हूं २ ह्रीं २ स्वाहा क्रीं ३ हूं २ ह्रीं २
श्मशानकालिके क्रीं ३ हूं २ ह्रीं २ स्वाहा क्रीं ३ हूं २ ह्रीं २ महाकालि क्रीं ३ हूं २ ह्रीं २ स्वाहा एतेषां सर्वं काली वत् अथ ताराभेदाः ॐ ह्रीं स्त्रीं हूं स्त्रीं हूं फट् इयं ब्रह्मोपासिता ऐं ह्रीं श्रीं क्लीं सौः हूं उग्रतारे हूं फट् वि
ष्णूपासिता ॐ हूं स्त्रीं ह्रीं सौः हूं फट् द्वितीया विष्णूपासिता ऐं ह्रीं श्रीं क्लीं सौः द्वितीया ब्रह्मोपासिता ॐ ह्रीं हूं स्त्रीं हूं फट् स्त्रीं हूं स्त्रीं हूं फट् इत्येकजटाद्वयं स्त्रीं हूं फट् ह्रीं ऐं नारायणोपासितेयम् अस्य श्रीम
द्विद्यानां वसिष्ठराजर्षि ऋषिः गायत्री छंदः तारा देवता ध्यानं श्वेतांबरां चंद्रकलावतंसां सस्मेरवक्त्रां शरदिन्दुकान्तिं कर्त्रीकपाले दधतीं कराभ्यां तारां त्रिनेत्रां प्रभजे विलग्नाम् पु·ल·१ ॐ न ४
मो भगवत्येकजटे मम वज्रपुष्पं प्रतीच्छ स्वाहा पतंजलि ऋषिर्गायत्री छंदः एकजटा देवता पु·ल·१ ॐ ह्रीं श्रीं क्लीं स्त्रीं हूं फट् नीलसरस्वत्यै स्वाहा ब्रह्मा ऋषिः गायत्री छंदः नीलसरस्वती दे
वता ध्यानं घोरघोरास्वरूपां समसिंकरां सिंहमिन्द्रवीं चन्द्रकलावतंसां प्रत्यक्षतीपादतलेपरशुं नाम भजे सुदां नीलसरस्वतीश्रीम् पु·ल·२ श्रीं ह्रीं क्लीं हूं नमस्तारायै सकलदुःखतारा नाथ्य २ तारे २ स्वाहा
